माता इव रक्षति । पिता इव हिते नियुङ्क्ते । कान्ता इव च अभिरमयति अपनीय दुःखम् ।  कीर्तिं च दिक्षु वितनोति, तनोति लक्ष्मीम् ।  किं किं न साधयति कल्पलता इव विद्या ।  माता इव रक्षति । विद्या अस्मान् रक्षति । कथं रक्षति? माता इव रक्षति । यथा अस्माकं माता अस्मान् रक्षति, अस्मान् पालयति, तथा अस्माकं माता इव विद्या अस्मान् रक्षति, अस्मान् पालयति, अस्माकं रक्षां करोति ।

पुनः किं करोति? पिता इव हिते नियुङ्क्ते। यथा अस्माकं पिता अस्मान् सत्कर्मणि नियोजयति शुभ-कर्मणि नियोजयति, हित-कर्मणे हित-कार्ये नियोजयति, तथा पिता इव एषा विद्या अपि अस्मान् हिते नियुङ्क्ते, हित-कार्ये नियोजयति। हित-कर्मणि प्रेरयति, हित-कर्मणि प्रचोदयति।

कान्ता इव च अभिरमयति अपनीय दुःखम्। यथा अस्माकं कान्ता अस्माकं प्रिया अस्माकं दुःखम् अपनीय दुःखं दूरीकृत्य अस्मान् अभिरमयति अस्मान् आनन्दयति अस्मान् नन्दयति, तथा कान्ता इव कान्ता सदृशी इयं विद्या अपि अस्माकं दुःखम् दूरीकृत्य अस्मान् आनन्दयति अस्मान् नन्दयति अस्माकं मनः रञ्जयति।

कीर्तिं च दिक्षु वितनोति।  इयं विद्या पुनः किं करोति? कीर्तिं च दिक्षु वितनोति।  अस्माकं कीर्तिम् अस्माकं यशः अस्माकं ख्यातिं दिक्षु सर्वासु दिक्षु चतुर्षु दिक्षु दिक्-चतुष्टये अर्थात् सर्वत्र सर्वस्मिन् स्थाने वितनोनि प्रसारयति विस्तारयति।

पुनः किं करोति? तनोति लक्ष्मीम्।  इयं विद्या अस्माकं कृते लक्ष्मीं तनोति।  तनोति आनयति प्रददाति। ---लक्ष्मीं प्रददाति, लक्ष्मीं आनयति।  अस्माकं कृते धनं प्रददाति, धनम् आनयति।  लक्ष्मीं धनम् इति अर्थः ।

अतः किं किं न साधयति कल्पलतेव विद्या? इयं विद्या कल्पलता इव किं किं न साधयति? अर्थात् इयं विद्या कल्पलता इव अस्माकं सर्वं साधयति सर्वं कार्यं साधयति । --- कल्पलता कल्पवृक्षः कल्पतरुः कल्पद्रुमः।  कल्पलता कल्पलतिका। स्वर्गे इन्द्रस्य उद्याने कश्चित् विशेष-वृक्षः अस्ति । सः कल्प-वृक्षः कल्प-द्रुमः कल्प-तरुः इति नाम्ना ज्ञायते।  वयम् अस्माकं मनसि यत् इच्छामः यत् चिन्तयामः अस्माकं सर्वं मनोरथम् एषः कल्पवृक्षः पूरयति। वयं यत् इच्छामः वयं यत् वाञ्छामः एषः वृक्षः अस्मभ्यं सर्वं

ददाति । यथा कल्पलता अपि कल्पवृक्षः इव अस्माकं मनो-कामनां पूरयति, मनो-रथं पूरयति । वयं यत् इच्छामः यत् वाञ्छामः सर्वं ददाति । अतः कल्पलता इव विद्या अपि अस्माकं किं किं न साधयति? अस्माकं कृते किं किं न साधयति? अर्थात् कल्पलता इव कल्पलता सदृशी यथा कल्पलता अस्माकं मनो-रथं पूरयति तथा एषा विद्या इयं विद्या अपि अस्माकं कृते सर्वं कार्यं साधयति सर्वं कार्यं संपादयति ।

माता इव रक्षति, पिता इव हित-कार्ये नियोजयति, कान्ता इव प्रिया इव अस्माकं दुःखं दूरीकृत्य मनः रञ्जयति मनः आनन्दयति मनः प्रासादयति । अस्माकं यशः सर्वासु दिक्षु प्रसारयति विस्तारयति । अस्माकं कृते लक्ष्मीं तनोति धनं प्रददाति । अतः कल्पलता इव इयं विद्या अस्माकं कृते सर्वं कार्यं साधयति सर्वं कार्यं संपादयति इति सुभाषितं वदति ।